/

# विषय - संस्कृत रचना

पाठ्यांशनाम – शब्दव्युत्पादनम्,वाक्यरचना बोधाभिव्यक्तयश्च पाठ्यांशसंकेत: - अ.सं.५०१

स्तर:-शास्त्री पूर्णाङ्का :-५०

वर्ष:- तृतीय: वार्षिक: पाठ्यभार:-८० पा.घ.

पत्रम्- द्वितीयम् साप्ताहिक: पाठ्यभार:-३

१.पाठ्यांशपरिचय:

त्रिषु प्रकरणेषु विभक्तोऽयं पाठ्यांश: । शास्त्रिस्तरेऽध्येतुकामानां छात्राणां संस्कृतवाङ्मयस्य वैशिष्ट्यविश्लेषणाय प्रवेशद्वारभूतोऽयं पाठ्याशोऽस्ति निर्धारित: । निर्धारितशब्दानां निष्पादनद्वारा शब्दभण्डाराभिवृद्धये वाक्यस्वरूपाणाञ्च तत्प्रकाराणाञ्च मिथ: परिवर्तनं विधाय स्तरीयसंस्कृतभाषाया: प्रयोगे वैशिष्ट्यप्रदर्शनविधौ पाठ्यांशोऽयं परमोपयोगी ।

२. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषयषु प्रावीण्यमेष्यन्ति

- उणादिशब्दानां ससूत्रं सिद्धिप्रक्रियाप्रदर्हने
- संस्कृतवाङ्मये प्रयुक्तानां कतिपयपारिभाषिकशब्दानां सन्दर्भानुसारेण प्रयोगकौशलप्रदर्शने ।
- सलक्षणावाक्यप्रकारपरिशीलने
- स्वतन्त्रलेखने,सन्दर्भार्थप्रकाशने च ।

३. पाठ्यांशस्य विशिष्टोद्देश्यानि,पाठ्Øविषयसंयोजनञ्च

| प्रकरणा नि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषया: | अङ्का: | पाठ |
|---|---|---|---|---|
| क | उणादिप्रत्ययान्तानां शब्दानां सिद्धिप्रदर्शनम् | निर्धारितप्रत्ययान् प्रयुज्य ससूत्रं शब्दसिद्धि: वाक्येषु प्रयोगश्च | १० | १५ |
| ख | पारिभाषिकशब्दावलीनां सन्दर्भानुसारेण प्रयोगप्रकाशनम् | निर्धारितपारिभाषिकशब्दा: | १० | १५ |
| ग | वाक्यसिद्धान्तानुशीलनम् | सप्रकारवाक्यपरिचय:,वाक्ये पदव्यवस्था कारकनियमा:, रचनार्थकालवचनवाच्यानुसारेण वाक्यपरिवर्तनम्, वाक्यविश्लेषणम्,स्वल्पवाक्यानां | १० | १५ |

Thank you for trying PDF Suite

CS CamScanner

| | | | | |
|---|---|---|---|---|
| | | संश्लेषणञ्च । | | |
| घ | बोधाभिव्यक्तय: | दृष्टादृष्टान् गद्यखण्डान् कानिचन पद्यानि वा आदाय कृतानां प्रश्नानामुत्तरलेखनम्<br>कथाकवितानिबन्धप्रतिवेदन पत्रसम्पादकीयादीनां लेखनाभ्यास: | २० | ३० |

४. पाठ्यवस्तुविवरणम्

क प्रकरणे उणादिप्रत्ययान्तानां शब्दानां सिद्धिप्रदर्शनम्

१. उण,ञुण,उ,उरच्,ष्टिषच्,,किरच्, इलच् एरक् ओतच्,डवतुप्, ओरन् ओलच्,ऊरन्, तुन्, ऊ, ऊति, उलच्,इति, ढ,ठ,ख,कल, ड, आलच्, कालन्, आलञ्,अङ्गच्, गन्, अण्डन्, अदि, अजि, मदिक्, मन्, मक् कन्, वन्प्रत्ययनिष्पन्नानां शब्दानां ससूत्रं सिद्धिप्रक्रियाप्रदर्शनम् ।

२ एणु (करेणु:) क्थन् (कुण्ठा, काष्ठम्, ओष्ठ:, कोष्ठ: गाथा ,अर्थ: सार्थ:, रिक्थम्, सिक्थम् , निशीथ:,यूथम्) रक् (स्फारम्, चक्रम्, वक्र:,क्षुद्र:, चन्द्र:,नीर:, मुद्रा, शुभ्रम् ,आम्रम्, ताम्रम्, निद्रा,आर्द्रम्,शूद्र:, दूरम्,क्रूर:,रुद्र:शूर:,सीरम्,चीरम्,)क्वुन्रजक:,तक्षक:,पुत्रक:,चरक:,चषक:,भञ्जक: वधक:, कुहक: हिंसक:, आमलक:,कलापक:,धमक कृषक:)किकन् (वृश्चिक:,मूषिक:) इकन् (त्रयिक:, आपणिक:) इनच् (श्येन:,हरिण:वृजिनम्,अजिनम्, कठिनम्,द्रविणम् हरिण: विपिनम् ,तलिनम् , गुर्विणी,रोहिणी) क्विप् (श्री:, वाक्, प्रावृट्,ॠक् परिव्राट्,)युच् (यवन:,वरण: रशना,भुवनम्, किरण:, धिषणा, ) तृच् (नप्ता, प्रनप्ता, याता) ऋन् (जामाता,माता,पिता, दुहिता, ननान्दा देवा ) इष् (हवि: वर्हि: ज्योति:) उस् (जनु:, मधु: वपु:, तनु:, आयु:,मुहु:) नक् ( इन:, फेन: मीन: कृष्ण: पर्णम्, लक्ष्मण:, लक्षण: कर्ण:,वर्ण:, द्रोण: अन्नम् ,तीक्ष्ण:स्वप्न:) नु (भानु:, सूनु:) उन: ( करुण:,वरुण:अर्जुन:तरुण:) स (वर्ष:, वत्स: योषा, मांस:) एतेषां प्रत्ययार्थनिर्देशपुर:सरं प्रकृतिप्रत्यनिर्देशे यथालिङ्गं वाक्येषु प्रयोगे चाभ्यास:।

ख प्रकरणे – कतिपयसंस्कृतपारिभाषिकशब्दानां प्रयोग: ।

१ वेद: वेदाङ्ग: अपसव्य:, सव्यम्, तर्पणम्, स्वाहा, स्वधा, स्रुवा, प्रणीता,प्रोक्षणी, संस्कार:,स्पय:, जुटिका, सप्ताह:, नवाह:, नगाह: पञ्चामृतम्, गोत्रम्, प्रवर:, पञ्चोपचार:, षोडशोपचार:,

Thank you for trying PDF Suite
CamScanner

२. व्यञ्जना, रसः, ध्वनिः, अलङ्कारः, व्यञ्जना, अभिधा, लक्षणा, औचित्यम्, वक्रोक्तिः, रसाभासः, भावः, दोषः, गुणः, रीतिः, नाटकम्, नाटिका, चम्पूः खण्डान्वयः, दण्डान्वयः, सङ्केतः,

३ .मोक्षः, अपवर्गः, उपनिषत्, प्रकृति, पुरुष, साङ्ख्यः, सत्कार्यवादः, विकृतिः, जीवन्मुक्तः, तत्त्वमसि, ध्यानम्, योगः, अन्तःकरणम्, आसनम्, जीवः, ब्रह्म, शून्यवादः, द्वैतवादः अद्वैतवादः,द्वैताद्वैतवादः, पञ्चीकरणम् अनुक्रमणिका, यमः, नियमः,धारणा, समाधिः महायानम् हीनयानम्, स्याद्वादः, श्वेताम्बरः, दिगम्बरः, चर्या, तीर्थङ्करः हेतुः, हेत्वाभासः, शाब्दबोधः,

४. अनुवादः, टीका, भाष्यम्, कारिका, सूत्रम्, वार्त्तिकम्,

५ वक्री मार्गी युतिः, अक्षांशः, लघुवृत्तम्, दीर्घवृत्तम्, भूपरिधिः, :,अहर्गणः, आकाशगङ्गा, ग्रहणम्, संवत्सरः, महादशा,

गप्रकरणे – **वाक्यसिद्धान्तानुशीलनम्**

वाक्यलक्षणम्, वाक्यावयवाः, वाक्यतत्त्वानि, कारकपरिचयः, वाक्यप्रकाराः,(रचनानुसारेण, अर्थानुसारेण, वाच्यानुसारेण) मिथः वाक्यपरिवर्तनम् (वचनानुसारेण, पुरुषानुसारेण, लिङ्गानुसारेण, अर्थानुसारेण, पक्षानुसारेण, कालानुसारेण, वाच्यानुसारेण) सरलवाक्यानां संयुक्तवाक्ये मिश्रवाक्ये च संश्लेषणम्, संयुक्तवाक्यस्य मिश्रवाक्यस्य च विश्लेषणम्,वाक्यान्तर्गतानां पदानां परिचयः, विशेष्यस्य लिङ्ग–वचनानुसारेण विशेषणस्य प्रयोगज्ञानम्, संक्षेपीकरणम्, विस्तृतीकरणञ्च ।

घप्रकरणे – बोधाभिव्यक्तयः

(क) बोधः–अस्य कृते गोरखापत्र–गाण्डीव–नवप्रभात–संस्कृतसञ्जीवनमित्यादिसंस्कृतपत्रिकासु तदन्यत्र वा प्रकाशितानां स्वयमुद्भावितानामप्रकाशितानाञ्च स्तरीयलेखानां तदितरेषां वा प्रौढनिबन्धानां गद्यभागान् नीतिपद्यानि चादाय प्रश्नोत्तरेऽभ्यासः ।

(ख) निबन्धरचना – निबन्धपरिचयः, तस्य प्रकाराः,तस्याङ्गानि ।(निबन्धलेखनविषयेयेषु सामाजिकाः, नीतिसम्बद्धाः, षोडशसंस्कारपरिचयप्रदाः, नैपालकपर्वपरिचयसम्बद्धा राष्ट्रियविभूतिवैशिष्ट्य द्योतका विषया अपि ग्रहीतुं शक्यन्ते ।)

(ग) कथारचना–पौराणिकसामाजिकैतिहासिकादिविषयमवलम्ब्य लघुकथा रचनाभ्यासः ।

(घ) मुक्तकरचना– छन्दोबद्धानां तदितराणाञ्च मुक्तकानां लेखनेऽभ्यासः ।

(ङ) प्रतिवेदनलेखः–समसामयिकं तदितरं वा विषयमवलम्ब्य प्रतिवेदनलेखाभ्यासः।

ङ) पत्रादिरचना –व्यावहारिकपत्रलेखाद्यभ्यासः ।

५.शिक्षणविधयः शैक्षिकसामग्री च

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदिरे अन्वेषणपरियोजनसम्बद्धा प्राक्कल्पनादयश्छात्रकेन्द्रिता अन्ये विधयोऽपि

Thank you for trying PDF Suite

CS CamScanner

प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव निर्धासितनिबन्धादीनां पाठाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते ।तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरम् (निर्माणात्मकम्) बाèम् (निर्णयात्मकम्) च । आन्तरमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षा परीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरमूल्याङ्कनस्य कृते दशाङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे नियमितच्छात्राणां कृते बाह्यपरीक्षायाः पूर्णाङ्काः चत्वारिंशदङ्काःभवन्ति, परन्तु व्यक्तिगतच्छात्राणां कृते तु शतमेव । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्धयति ।

वार्षिक-परीक्षा-प्रश्नपत्रसारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| घ | निबन्धात्मकः | २ | १ | ८ |
| क,ख,ग | संक्षिप्तोत्तरापेक्षिणः | ५ | ३ | १८ |
| घ | व्याख्यात्मकः (बोधात्मकः) | १ | १ | ८ |
| क,ख,ग, | वस्तुगताः | ६ | ६ | ६ |
| प्रश्नसंख्याः | | ११ | ९ | ४० |
| आन्तरमूल्याङ्कनम् | | | | १० |
| पूर्णाङ्काः | | | | ५० |

पाठ्यग्रन्थाः

भट्टोदीक्षितः, सिद्धान्तकौमुदी, तत्त्वबोधिनीटीकासहिता (उणादिप्रकरणे सम्बद्धांशः) चौखम्बाप्रकानम्, वाराणसी, भारत

२. सहायकग्रन्थः

Thank you for trying PDF Suite
CamScanner

(क). युधिष्ठिरमीमांसकः, उणादिकोषः, हरयाणा , भारतम्

(ख) सिग्यालः, सोमनाथः अनुवादचन्द्रिका, (तृतीयचतुर्थप्रकाशौ )

(ग). ढुङ्गानाः, नीलमणिः, संस्कृतशिक्षणाभ्यासः, नेपाल संस्कृतविश्वविद्यालयः, बेलझुण्डी, दाङ ।

(घ) कौण्डिन्यायनः, प्रमोदः (डा.) व्यावहारिकं संस्कृतम्, तृतीयं पुष्पम् , स्वाध्यायशालाकुटुम्बम्, काष्ठमण्डपनगरम् २०५८

(ङ) .प्रोखेलः, मोहनः, संस्कृतरचना, पुस्तकघर, काठमण्डपः ।

(च) मिश्रः, रामचन्द्रः प्रबन्धपारिजातः चौखम्वाविद्याभवन सिरीज अपिस, वाराणसी

(छ ) रमेशचन्द्रः (डा.) वि.सं.२०२३. प्रबन्धरत्नाकरः. चतुर्थसंस्करणम्. वाराणसीः चौखम्बा सुरभारती प्रकाशन ।

(ज) श्रीकृष्ण सेमवालः (सं.) संस्कृतवाङ्मये विज्ञानम् , दिल्ली संस्कृत एकादमी, दिल्ली ।

.(ज) द्विवेदी, कपिलदेवः (डा.). *रचनानुवादकौमुदी,* सन् १९८७. वाराणसीः विश्वविद्यालयप्रकाशन । विद्याभवनम् वाराणसी ।

३. संस्कृतपत्रिकाः

१ गोरखापत्रे प्रकाशिताः संस्कृतनिबन्धाः, लेखाश्च ।

२. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, गाण्डीवम्, वाराणसी ।

३ देववाणीपरिषद् ,अर्वाचीनसंस्कृतम्, नयाँ दिल्ली ।

४.लालबहादुर शास्त्री संस्कृतविद्यापीठम् शोधप्रभा, नयादिल्ली ।

५.राष्ट्रियसंस्कृतसंस्थान, संस्कृतविमर्शः,नयाँ दिल्ली ।

सन्दर्भग्रन्थाः

१.. ढुङ्गाना, नीलमणि व्युत्पत्तिमूलक संस्कृत- नेपाली शब्दकोश, ललितपुर : साझाप्रकाशन, २०७८ ।

Thank you for trying PDF Suite

CamScanner

आदर्शप्रश्नपत्रम्

शास्त्रिपरीक्षा

विषयः - अनिवार्यसंस्कृतम् | खण्डः - तृतीयः
पूर्णाङ्काः - ४०

पत्रम् – तृतीयम् | समयः - घण्टात्रयम्

½१. अधोलिखितविषयैषु कमप्येकं विषयमवलम्व्य निबन्धो रच्यताम् ।
८

क) यशः पुण्यैरवाप्यते (ख) आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते । (ग) विद्ययाऽमृतमश्नुते ।

अथवा

दावानलेन प्रदग्धानां भवनानां क्षतेर्विषयमवलम्व्य प्रतिवेदनं विरच्यताम्

२. प्रकृतिप्रत्यविच्छेदो विधीयताम् ।
६

गाथा, हरिणः, प्रनप्ता, लक्ष्मणः, अपणिकः, भानुः ।

अथवा

तालुः, कुबेरः, शण्ढः – एते प्रयोगाः ससूत्रनिर्देशं साध्यन्ताम्

३. अधोलिखितपारिभाषिकशव्दान् प्रयुज्य स्वल्पोनुच्देदो लिख्यताम् ।

प्रकृतिः,पुरुषः, ब्रह्म, अद्वैतवादः, स्याद्वादः,शून्यवादः ।

अथवा

अधोलिखितशब्दानामर्थं विलिख्य वाक्येषु प्रयोगो विधीयताम् ।

नगाहः, कारिका, वार्त्तिकम्, अनुक्रमणिका, लघुर्वत्तम्, प्रणीता ।

४. संयुक्तमिश्रवाक्ययोः पार्थक्यं प्रकाश्यताम्
६

अथवा

सरलमिश्रवाक्याभ्यां वसन्तस्य सौन्दर्यं वर्ण्यताम् ।
६

५. अधोलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिख्यन्ताम् । १×
८ऽ८

स्वप्नसम्वद्धविषयाणामाकरा वेदाः,रामायणम्, महाभारतम्, पुराणानि, विविधशास्त्राणि, काव्यानि च सन्ति । स्वप्नावस्थायां स्थूलशरीरस्यास्तित्वज्ञानं नभवति । निद्रारतपुरुषस्य विषयानुभव एव स्वप्न इति कथ्यते । साहित्यशास्त्रे त्रयत्रिंशद् सञ्चारिभावेषु एकतमः स्वप्नोऽपि गणितः । स

Thank you for trying PDF Suite
CamScanner

च उच्छ्वास निःश्वासादिभिरभिव्यज्यते । शारीरमानसभेदेन स्वप्नहेतुर्द्विविधः । अप्रियवातावरणे पीडातिशये चाप्रियकराः स्वप्नाः प्रायशो दृश्यन्ते । आनन्दानुभूतौ प्रायेण सुखकराः स्वप्ना विलोक्यन्ते । शयनकाले प्रायो ऽप्रियशब्दानां सम्पर्कादप्रियाः स्वप्नाः कर्णप्रियध्वनीनाञ्च श्रवणादानन्द दायकाः स्वप्नाः सञ्जायन्ते कोऽपि वाह्यः शीतल उष्णो मधुरः कर्कशो वा शब्दः स्वप्ने स्वसम्बन्धं जनयति । मनसः क्षुब्धावस्था च स्वप्नानां कारणं भवति । आन्तरेच्छापि स्वप्ने स्वरूपं दर्शयति । फ्रायडमतानुसारेण सर्वेषां स्वप्नानां कारणमतृप्ता वासना एव । जनानां मनसि नैका आकाङ्क्षा भवन्ति । लोकानां तासां तृप्त्या शान्तिर्भवति, व्यवहारे प्रतिकूलानाञ्च तासां तृप्तिर्न भवति । बलान्निगृहीतास्ताः न विनश्यन्ति । अचेतने मनसि अव्यक्तरूपेण तिष्ठन्ति । ता एव स्वप्नव्याजेन बहिरायान्ति ।

(क) स्वप्नशब्देन कस्यार्थस्य बोधो भवति ?

(ख) स्वप्नविषयस्य चर्चा कुत्रोपलभ्यते ?

(ग) मुख्यतया स्वप्नः कतिविधः ?

(घ) .दुःस्वप्नाः कदा दृश्यन्ते ?

(ङ) फ्रायडमते स्वप्नदर्शनस्य कारणं किमस्ति ?

(च) स्वप्नावस्थायां कस्यास्तित्वं न ज्ञायते ?

(छ) साहित्यशास्त्रे वर्णितः स्वप्नाभिधो व्यभिचारिभावः कैव्यज्यते ?

(ज) वासनाः कथमतृप्ता भवन्ति ?

(६) अतिसंक्षेपेणोत्तरं लिख्यताम् ।

१× ६ऽ६

(क) चपलः, पातालः इत्यनयोः प्रत्ययार्थो लिख्यताम् ।

(ख) कपेरोतच् पश्च इत्यस्य सोदाहरणमर्थो लिख्यताम् ।

(ग) वाच्यपरिवर्तनं क्रियताम् ।

दुष्टाः जनाः निरपराधिनं दीनं पीडयन्ति ।

(घ) अशुद्धिः संशोध्यताम् ।

ग्रामस्य परितः लताकुञ्जानि विद्यन्ते ।

(ङ) अधस्तनशब्दानामर्था लिख्यन्ताम् ।

चम्पूः, जुटिका, द्वैतवादः ।

(छ) अधस्तनपदे प्रयुज्य वाक्ये विरच्येताम् ।

प्रकृतिः, हीनयानम्

Thank you for trying PDF Suite
CamScanner